# MP BOARD CLASS 9 EXAM 2013

समय: घण्टात्रयम् ] **संस्कृत (सामान्य) : कक्षा IX** पूर्णाङ्क:—१००

निर्देशा:—१. सर्वे प्रश्ना: करणीया:।
२. प्रश्नानां सम्मुखे अङ्का: दत्ता:।

**प्रश्न १. अधोलिखितेषु चतुर्षु वाक्येषु कोष्ठकात् उचितधातुपदै: रिक्तस्थानानि पूरयत्—** ४

(i) कालिदास: महाकवि: ……………… । *(आसन्/आसीत्)*

(ii) बालका: गीतानि ……………… । *(गायन्ति/गायति)*

(iii) बलवान् ……………… सुखम्। *(एधन्ते/एधते)*

(iv) सन्मित्रं पापात् ……………… । *(योजयते/निवारयति)*

(v) श्रद्धावान् ……………… ज्ञानम्। *(लभते/लभन्ते)*

**प्रश्न २. उचितविकल्पं चिनुत—**

**(क) सत् + आचार: = ……………… भवति।** १

(i) सताचार:, (ii) सदाचार:, (iii) सदाआचार:, (iv) सत्चर:।

**(ख) वाक् + ईश: = ……………… भवति।** १

(i) वागईश:, (ii) वाघीश:, (iii) वागीश:, (iv) वाकीश:।

**(ग) ''जगन्नाथ:'' एतस्य पदस्य सन्धि-विच्छेदं भवति—** १

(i) जग + नाथ:, (ii) जगद् + नाथ:, (iii) जगत् + नाथ:, (iv) जगन् + नाथ:।

**(घ) अयादि सन्धि: अस्ति—** १

(i) एकैक:, (ii) नरेन्द्र:, (iii) इत्यादि:, (iv) पावक:।

**प्रश्न ३. समासाधारितं युग्ममेलनं कुरुत—** ३

| 'अ' | 'ब' |
|---|---|
| (क) दीनदानम् | (i) कर्मधारय समास: |
| (ख) महादेव: | (ii) बहुव्रीहि समास: |
| (ग) चन्द्रशेखर: | (iii) तत्पुरुष समास: |

**प्रश्न ४. अधोलिखितेषु चतुर्षु वाक्येषु प्रयुक्तानां कृदन्तप्रत्ययानां नामानि कोष्ठके लिखत—** ४

(i) स: शयान: हसति।

(ii) बालक: हसित:।

(iii) रामस्य वचनं श्रुत्वा सीता अवदत्।

(iv) अहं संस्कृतं पठितुं शक्नोमि।

(v) बालिका हसितवती।

**प्रश्न ५. अधोलिखितेषु पदेषु उपसर्गयुक्तयो: पदयो: चित्वा लिखत—** २

(i) अपशब्द:, (ii) लिखति, (iii) आदाय,
(iv) बालकेन, (v) कम्पमान:, (vi) संकल्प:।

**प्रश्न ६. अधोलिखितेषु शब्देषु अव्ययानां चित्वा लिखत—** २

(i) अद्य, (ii) त्वम्, (iii) संस्कृत,
(iv) खलु, (v) बालिका, (vi) रामात्।

**प्रश्न ७. निम्नलिखितासु द्वयो: कोष्ठकात् उचितपदं चित्वा सूक्तिनिर्माणं कुरुत—** २

(क) योग: ……………… कौशलम्। *(कर्मसु/धर्मसु)*

(ख) आहारे व्यवहारे च त्यक्त लज्जा ……………… भवेत्। *(सुखी/दु:खी)*

(ग) उपायेन हि यच्छक्यं तन्न शक्यं ……………… । *(पुस्तकै:/पराक्रमै:)*

**प्रश्न ८. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत—** ४

(i) अतिथि: महाराणागृहात् अनश्नन् गतवान्।

(ii) कर्त्तव्यपालनमेव देशस्य समुन्नते: मूलमंत्र:।

(iii) सज्जनानां सङ्गति: करणीया।

(iv) एषा कथा कलियुगस्य अस्ति।

https://www.evidyarthi.in/

**प्रश्न ९. (अ) प्रदत्तशब्दैः रिक्तस्थानपूर्तिः करणीया—** ४

*(कर्क, आसीत्, बालमृगेन्द्रम्, राक्षसान्)*

(क) तस्य शिष्यः आरुणि ……………… ।

(ख) वत्स! मुञ्च ……………… ।

(ग) ……………… रेखा इतः एव निर्गता।

(घ) वनं गत्वा रामः ……………… निजघान।

**(ब) अधोलिखितानां उचितमेलनं कुरुत—** ४

| 'अ' | 'ब' |
|---|---|
| (क) सोमशर्मा | (i) नार्जितं पुण्यं |
| (ख) तृतीये | (ii) सम्मोहः |
| (ग) राजा | (iii) पुत्रः |
| (घ) क्रोधात् | (iv) बालस्य पिता |

**प्रश्न १०. निम्नलिखितेषु चतुर्णां प्रश्नानां उत्तराणि संस्कृतभाषायाम् एकपदेन देयानि—** ४

(क) जातस्य ध्रुवं किम्?

(ख) आरुणिः केदारखण्डे किमकरोत्?

(ग) हस्ते: नाम किमासीत्?

(घ) एकां वेणी का धृतवती?

(ङ) आहारसमं किं नास्ति?

**प्रश्न ११. निम्नलिखितेषु प्रश्नेषु त्रयाणाम् उत्तराणि संस्कृतभाषायाम् एकवाक्ये देयानि—** ६

(क) कः महान् पितृभक्तः आसीत्?

(ख) राजकुमारः कथं सुप्तवान्?

(ग) बुद्धिनाशात् किं भवति?

(घ) युक्तेन प्राणायामेन किं भवति?

**प्रश्न १२. अधोलिखित चतुर्णां शब्दानां रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत—** ४

(क) रमा तृतीया विभक्तिः।

(ख) नदी सप्तमी विभक्तिः।

(ग) फल द्वितीया विभक्तिः।

(घ) तत् पुं. पञ्चमी विभक्तिः।

(ङ) युष्मद् प्रथमा विभक्तिः।

**प्रश्न १३. अधोलिखितेषु पञ्च अशुद्धकारकवाक्यानां शुद्धिः करणीया—** ५

(क) युवकः अश्वम् पतति।

(ख) सः रामः पुत्रः अस्ति।

(ग) कृष्णस्य परितः भक्ताः सन्ति।

(घ) मम जननी भोजनं पचन्ति।

(ङ) एकः बालिका तत्र पठति।

(च) सुरेशः पुस्तकः पठति।

**प्रश्न १४. अधोलिखितवाक्यानां क्रमसंयोजनं कुरुत—** ५

(i) तस्य कोटरे वृद्धः जरद्गवनामा गृध्रः प्रतिवसति

(ii) अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः।

(iii) एवं विश्वस्य स मार्जारः तरुकोटरे स्थितः।

(iv) सर्वे पक्षिभिः निश्चित्य गृध्रो व्यापादितः।

(v) ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति।

(vi) अथ कदाचित् दीर्घकर्णनामा मार्जारः पक्षिशावकान्भक्षितुं तत्रागतः।

https://www.evidyarthi.in/

प्रश्न १५. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् कण्ठस्थीकृतं सुभाषितद्वयं लिखत। ४

प्रश्न १६. अधोलिखित गद्यांशं सम्यक् पठित्वा प्रश्नानां संस्कृतभाषायाम् उत्तराणि लिखत—

अस्माकं भारतवर्षं बहुप्राचीनः अति पवित्रो विशालदेशश्च अस्ति। अत्रैव षड्ऋतवः, नारायणस्य च विविधा अवतारा भवन्ति। संसारस्य सर्वोच्च शैलः हिमालयोऽपि अस्य शिरसि हेममुकुट इव राजते। इत एव गङ्गा-यमुनाद्या नद्यो वहन्ति। अत्रैव काशी-अयोध्या-मथुरा-मायाद्यास्ताः प्राचीनाः सप्तपुर्य्यः सन्ति।

(क) अस्य गद्यांशस्य शीर्षकं लिखत। २

(ख) हिमालयः कुत्र विराजते? १

(ग) गङ्गा-यमुनाद्या नद्यो कुत्र वहन्ति? १

(घ) सप्तपुर्य्यः कुत्र स्थितोऽस्ति? १

प्रश्न १७. अधोलिखितेषु गद्यांशेषु गद्यांश द्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि— १०

(अ) एकदा स तपस्वी गङ्गातीरे जपार्थमुपविष्टः। तस्मिन्काले कयाचित् बलाकया उड्डीयमानया तदङ्गोपरि पुरीषोत्सर्गः कृतः। स च तपस्वी क्रोधाकुलितनेत्रः यावदूर्ध्वं पश्यति तावत् क्रोधाग्निना भस्मीभूतां बलाकं भूमौ पतितां दृष्ट्वा नारायणद्विजगृहे भिक्षार्थं ययौ। स्वभर्तृशुश्रूषापरया तत्पत्न्याकोपाभिविष्टो निर्भर्त्सितः सत्पक्षिहायमुक्तश्च-'नाहं बलाकेव त्वत्कोपस्थानम्'।

प्रश्नाः— (i) एकदा सः तपस्वी जपार्थम् कुत्र उपविष्टः ?

(ii) बलाकया मुनेः अङ्गोपरि किं कृतम् ?

(iii) मुनिः भिक्षार्थं कुत्र ययौ ?

(iv) तत्पत्न्या कोपाभिविष्टो किम् उक्तम् ?

(v) 'कृतः' इत्यस्य पदस्य प्रकृतिप्रत्ययञ्च पृथक्कुरुत।

(ब) इयम् भूमिः कर्मभूमिः अस्ति, कर्त्तव्यभूमिः अस्ति। अस्मिन् संसारे यावन्तः जनाः जन्म गृह्णन्ति तेषां सर्वेषामपि पृथक्-पृथक् कर्त्तव्यानि भवन्ति। तानि अनेकाविधानि भवन्ति। कानिचित् व्यक्तिगतानि, कानिचित् पारिवारिकाणि, कानिचिच्च सामाजिकानि भवन्ति! एवं च प्रत्येक मनुष्योपरि अनेकविधानां कर्त्तव्यानां पालनस्य महान् भारो वर्तन्ते।

प्रश्नाः— (i) इयम् भूमिः किं भूमिः अस्ति ?

(ii) सर्वेषामपि जनानां पृथक्-पृथक् कानि भवन्ति ?

(iii) कर्त्तव्यानि कथं भवन्ति ?

(iv) प्रत्येकं मनुष्यस्योपरि केषां पालनस्य महान् भारो वर्त्तते ?

(v) 'अस्मिन्' इत्यस्य पदस्य विभक्तिं वचनञ्च लिखत।

(स) पिप्पलः वर्षं यावत् जलम् अन्नं च अस्वीकृत्य वायुमात्रं सेवमानः तपः आचरितवान्। तपसः प्रभावेण तस्य शरीरे अपूर्वं तेजः प्रकाशत। सन्तुष्टाः देवाः तस्य उपरि पुष्पवृष्टिं कृतवन्तः। इन्द्रः प्रत्यक्षः भूत्वा "वरं याचतु" इति उक्तवान्। पिप्पलः—"अशेषं विश्वं मम अधीनं भवतु" इति वरमयाचत्।

प्रश्नाः— (i) तस्य शरीरे कं प्रकाशत ?

(ii) कस्य उपरि देवाः पुष्पवृष्टिं कृतवन्तः ?

(iii) पिप्पलः कं वरं याचितवान् ?

(iv) 'सेवमानः' इत्यस्य पदस्य प्रकृतिप्रत्ययञ्च पृथक् कुरुत।

(v) 'इन्द्रः' शब्दस्य पर्यायशब्दान् लिखत।

प्रश्न १८. अधोलिखित पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् देयानि— १०

(अ) रूपयौवनसम्पन्ना, विशालकुलसम्भवाः।
विद्याहीना न शोभन्ते, निर्गन्धा इव किंशुकाः।

प्रश्नाः— (i) किं सम्पन्ना विद्याहीन न शोभन्ते ?

(ii) किं सम्भवाः विद्याहीना न शोभन्ते ?

(iii) किं हीना न शोभन्ते ?

(iv) निर्गन्धा किम् इव विद्याहीना न शोभन्ते ?

(v) 'शोभन्ते' इत्यस्य पदस्य धातुः, लकारं, पुरुषं, वचनं च लिखत।

https://www.evidyarthi.in/

प्रश्ना:— (i) केन समं दु:खं नास्ति ?
(ii) क्षुधासम: क: नास्ति ?
(iii) केन समं सौख्यं नास्ति ?
(iv) क्रोधसम: क: नास्ति ?
(v) 'नास्ति' इत्यस्य पदस्य सन्धि-विच्छेदं कृत्वा सन्धे: नाम लिखत।

(स) नन्दिग्रामे जटां हित्वा, भ्रातृभि: सहितोऽनघ:।
राम: सीतामनुप्राप्य, राज्यं पुनरवाप्तवान्।

प्रश्ना:— (i) राम: कीदृश: अस्ति ?
(ii) राम: काम् अनुप्राप्य राज्यं आप्तवान् ?
(iii) राम: पुन: किम् आप्तवान् ?
(iv) राम: नन्दिग्रामे किं कृतवान् ?
(v) 'भ्रातृभि:' इत्यस्य पदस्य विभक्ति: वचनञ्च लिखत।

**प्रश्न १९. स्वस्य प्राचार्यस्य कृते दिवसत्रयस्य अवकाशप्रार्थनापत्रं संस्कृते लिखत।** ४

***अथवा***

**स्वस्य मित्रस्य कृते जन्मदिवसस्य शुभकामनापत्रं संस्कृते लिखत।**

**प्रश्न २०. अधोलिखितेषु एकं विषयं स्वीकृत्य संस्कृते निबन्धं लिखत—** १०

(अ) शिक्षक:, (ब) पुस्तकम्, (स) धेनु:, (द) अस्माकं विद्यालय:।

---

## उत्तर

१. (i) आसीत्, (ii) गायन्ति, (iii) एधते, (iv) निवारयति, (v) लभते।
२. (क) (ii) सदाचार:, (ख) (iii) वागीश:, (ग) (iii) जगत् + नाथ:, (घ) (iv) पावक:।
३. (क) → (iii), (ख) → (i), (ग) → (ii)।
४. (i) शानच्, (ii) क्त, (iii) क्त्वा, (iv) तुमुन्, (v) क्तवतु।
५. (i) अपशब्द:, (vi) संकल्प:।
६. (i) अद्य, (iv) खलु।
७. (क) कर्मसु, (ख) सुखी, (ग) पराक्रमै:।
८. (i) न, (ii) आम, (iii) आम, (iv) न।

---

९. (अ) (क) आसीत्, (ख) बालमृगेन्द्रम्, (ग) कर्क, (घ) राक्षसान्।
(ब) (क) → (iii), (ख) → (i), (ग) → (iv), (घ) → (ii)।
१०. (क) मृत्यु:, (ख) संविवेश, (ग) कर्पूरतिलक:, (घ) शकुन्तला, (ङ) सौख्यम्।

| | | |
|---|---|---|
| १२. (क) रमया | रमाभ्याम् | रमाभि:। |
| (ख) नद्याम् | नद्यो: | नदीषु। |
| (ग) फलम् | फले | फलानि |
| (घ) तस्मात् | ताभ्याम् | तेभ्य: |
| (ङ) त्वम् | युवाम् | यूयम् |

१४. (ii) → (i) → (vi) → (iii) → (v) → (iv)।

https://www.evidyarthi.in/